*International Journal of Humanities & Social Science Studies (IJHSSS)*
*A Peer-Reviewed Bi-monthly Bi-lingual Research Journal*
*ISSN: 2349-6959 (Online), ISSN: 2349-6711 (Print)*
*ISJN: A4372-3142 (Online) ISJN: A4372-3143 (Print)*
*Volume-IX, Special Issue, June 2023, Page No. 209-212*
*Published by Scholar Publications, Karimganj, Assam, India, 788711*
*Website: http://www.ijhsss.com*
**DOI: 10.29032/ijhsss.v9.iSpecial.2023.209-212**

# आधुनिके समाजे वर्णव्यवस्थाया प्रासङ्गिकता

**ड. प्रलयो व्यानार्जी**
*सहायक अध्यापक, संस्कृत विभाग, पाँचमुड़ा महाविद्यालय, बाँकुड़ा, पश्चिम बंगाल, भारत*
Email: pralaybnrj40@gmail.com

**Abstract:**
*The system of caste presented by Lord Kṛṣṇa in the Śrīmad-Bhāgavat-Gita is the system of caste based on the modes of nature, not on the caste. The concept given of the varṇas, such as the brāhmaṇas, in the Gītā, is that the term varṇa should be understood to mean the three qualities, such as the mode of goodness. There, the difference between the three qualities by more or less is the difference of colour. That is, the difference of caste is not the same as the difference of caste, from the division of the former according to the qualities of the latter according to the lineage. In modern times, those who are considered to be the best of society are Brahmins, those who are employed to protect society are Kshatriyas, those who are engaged in trade are Vaishyas, and finally those who earn money by physical labor are Sudras.*

**Keywords: The caste system. The difference in caste. Differences in caste and race are not the same. The relevance of the caste system in modern society.**

**प्रबन्धसारः** श्रीमद्भगवगीतायां वैदिकदर्शनस्य गूढार्थः समुपलभ्यते। को ईश्वरः? का च प्रकृतिः इत्यादि नैकविधाः विषयाः तत्रोपलभ्यते। ब्राह्मणादि चतुःवर्णानां का प्रकृतिः भवेत्? कीदृशः स्वधर्मः भवितुमर्हेतिति विविधानि तत्त्वानि तत्राम्नायन्ते। सत्त्वादि गुणत्रयेण कर्मानुसारेण च ब्राह्मणादि चतुःवर्णानामुत्पत्तिः भगवता कृष्णेण स्वयमेव समुद्घोषितम्। समाजरक्षार्थं ब्राह्मणादिवर्णानां स्वधर्मपालनमत्यावश्यकमिति श्रीकृष्णेण सिद्धान्तितम्। एतेन सर्वेषां परमसिद्धिःप्राप्तिरपि सम्भवेत्। श्रीमद्भगवगीतायां श्रीकृष्णेण यादृशी वर्णव्यवस्था समुपस्थाप्यते सा तु गुणाणुगतवर्णव्यवस्था न तु जातिगतवर्णव्यवस्था । गीतायां ब्राह्मणादि वर्णानां या धारणा प्रदीयते तत्र वर्णपदेन सत्त्वादि गुणत्रय ज्ञातव्य इति। तत्र गुणत्रयस्य ण्यूणाधिक्येन यो भेदः स तु वर्णभेदः। अर्थात् वर्णभेदः जातिभेदः न तु समानमेव, आद्यस्य गुणानुगतविभागात् अन्तस्य वंशानुगतविभागात्। आधुनिके काले ये खलु तावत् विद्वांसः समाजस्य श्रेष्ठरूपेण परिगण्यते ते खलु ब्राह्मणाः, ये खलु तावत् समाजरक्षणाय नियुक्ताः ते खलु क्षत्रियाः, ये तावत् वानिज्ये निरताः ते वैश्याः, अन्ते ये तावत् दैहिकश्रमेन अर्थोपार्जनं करोति ते तावत् शूद्रा इत्यलमतिविस्तरेण ।

**कूटशब्दाः** वर्णव्यवस्था । जातिभेदः । वर्णभेदः जातिभेदः न तु समानमेव । आधुनिके समाजे वर्णव्यवस्थाया प्रासङ्गिकता ।

**उपोद्घातः** श्रीमद्भगवगीतायां वैदिकदर्शनस्य गूढार्थः समुपलभ्यते। को ईश्वरः? का च प्रकृतिः इत्यादि नैकविधाः विषयाः तत्रोपलभ्यते । ब्राह्मणादि चतुःवर्णानां का प्रकृतिः भवेत् ? कीदृशः स्वधर्मः भवितुमर्हेतिति विविधानि तत्त्वानि तत्राम्नायन्ते। तदुक्तम् श्रीकृष्णेण चतुर्थाध्याये –

*चार्तुवर्णं मया सृष्टं गुणकर्म विभागशः।*
*तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ।।* (गीतायाम्,4/13)

अर्थात् सत्त्वादि गुणत्रयेण कर्मानुसारेण च ब्राह्मणादि चतुःवर्णानामुत्पत्तिः भगवता कृष्णेण स्वयमेव समुद्घोषितम् । विषये अस्मिन् पुरुषसूक्ते समुद्घोषितं ऋषिणा –

*ब्राह्मणो अस्य मुखमासीद्बाहू राजन्यः कृतः।*
*ऊरू तदस्य यद्वैश्याः पद्भ्यां शूद्रो अजायत।।*

सत्त्वगुणप्रधाना ब्राह्मणाः, उक्तं श्रीकृष्णेण ब्राह्मणस्वधर्मविषये –

*शमो दमस्तपः शौचं क्षान्तिवार्जवमेव च ।*
*ज्ञानं विज्ञानमास्तिक्यं ब्राह्मकर्म स्वभावजम् ।।* (गीतायाम्,18/42)

आचार्यकौटिल्येनापि उक्तं तदीये अर्थशास्त्रे –
*स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति।* (अर्थशास्त्रे, विद्यासमुद्देशे, त्रयीस्थापनायाम् )।

**क्षत्रियाः** सत्त्वसंमिश्रितरजगुणप्रधानाः। क्षत्रियस्य स्वधर्मविषये आम्नायते –

*शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।*
*दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ।।* ( गीतायाम्,18/43)

**कौटिल्येनापि उक्तं:** *क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीव भूतरक्षणं च।* (अर्थशास्त्रे, विद्यासमुद्देशे, त्रयीस्थापनायाम् )।

तमःसंमिश्रितरजोगुणप्रधानस्य वैश्यस्य अपि च रजःसंमिश्रिततमोगुणप्रधानस्य शूद्रस्य स्वधर्म उद्गीयते प्रकारणेनानेन –

*कृषिगोरक्ष्यवानिज्यं वैश्यकर्म स्वभावजम् ।*
*परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ।।* (गीतायाम्,18/44)

अर्थशास्त्रानुसारं सम्प्रदायद्वयस्यास्य स्वधर्म भवत्येवम् – *वैश्यस्याध्ययनं यजनं दानं कृषिपशुपाल्यो वानिज्या च। शूद्रस्य द्विजातिशुश्रूषा वार्ता कारुकुशीलवकर्म च।* (अर्थशास्त्रे, विद्यासमुद्देशे, त्रयीस्थापनायाम्)।

समाजरक्षार्थं ब्राह्मणादिवर्णानां स्वधर्मपालनमत्यावश्यकमिति श्रीकृष्णेण सिद्धान्तितम् । एतेन सर्वेषां परमसिद्धिःप्राप्तिरपि सम्भवेत्। अतः श्रीकृष्णेण समुद्घोषितम् –

स्वे स्वे कर्मण्यभिरतःसंसिद्धिं लभते नरः। (गीतायाम्,18/45)

परन्तु अत्याधुनिके काले तद्वत् वर्णव्यवस्था नोपलभ्यते सर्वत्र। अतः गीताया वर्णव्यवस्थाया प्रसङ्गिकता नास्तीति चेन्न तत्र भिन्नरूपेण तस्य प्रयोगात्। श्रीमद्भगवगीतायां श्रीकृष्णेण यादृशी वर्णव्यवस्था समुपस्थाप्यते सा तु गुणाणुगतवर्णव्यवस्था न तु जातिगतवर्णव्यवस्था । विषयेस्मिन् प्रोक्तं कृष्णेण –

*ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप।*
*कर्मानि प्रविभक्तानि स्वभावप्रभवैः गुणैः।* ( गीतायाम्,18/41)

गीतायां ब्राह्मणादि वर्णानां या धारणा प्रदीयते तत्र वर्णपदेन सत्त्वादि गुणत्रय ज्ञातव्य इति । तत्र गुणत्रयस्य ण्यूणाधिक्येन यो भेदः स तु वर्णभेदः। वर्णशब्देन सत्त्वादि गुणत्रयस्य धारणा श्वेताश्वतरोपनिषदि परिलक्ष्यते तत्राम्नायते –

*अजामेकां लोहितशुक्लकृष्णां वह्वीः सृजमानां स्वरूपाः।*
*अजो ह्येको जुषमाणोनुशेते जहातोनां भुक्तभोगामजोहनाः।।* (श्वेताश्वतरोपनिषदि 4/5)

अर्थात् वर्णभेदः जातिभेदः न तु समानमेव, आद्यस्य गुणानुगतविभागात् अन्तस्य वंशानुगतविभागात् । तत्र भागवते अपि परिदृश्यते तद्वत्काचित् धारणा –

*यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम्।*
*यदन्यत्रापि दृश्यते तत्ते नैव विनिर्दिशेत्।।* (श्रीमद्भागवते 7/11/35)

तदाम्नायते महाभारते वनपर्वे –

*शूद्रे तु यद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते ।*
*न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः।।* (महाभारते,वनपर्वे,180)

मनुनापि प्रप्रश्चितम् –

अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ।।(मनुसंहितायाम्, 2/241)

अतः वक्तुमिष्यते यत् – आधुनिके काले ये खलु तावत् विद्वांसः समाजस्य श्रेष्ठरूपेण परिगण्यते ते खलु ब्राह्मणाः, ये खलु तावत् समाजरक्षणाय नियुक्ताः ते खलु क्षत्रियाः, ये तावत् वानिज्ये निरताः ते वैश्याः, अन्ते ये तावत् दैहिकश्रमेन अर्थोपार्जनं करोति ते तावत् शूद्रा इति शिवम् ।

**परिशीलिता ग्रन्थाः**

1) उपनिषद्, गीताप्रेस गोरक्षपुर,1412.
2) कौटिल्य, अर्थशास्त्र, गणपति शास्त्री, राष्ट्रिय संस्कृत संस्थानम् , दिल्ली, 2002.
3) घोष जगदीश चन्द्र, श्रीमद्भगवगीता, प्रेसिडेन्सि लाइब्रेरी, कलिकाता-73, फेब्रुयारी-2003.
4) प्रभुपाद आभयचरणारविन्द भक्ति वेदान्त स्वामी, श्रीमद्भगवगीता यथायथ, भक्तिवेदान्त वुक ट्रास्ट, प्रथम संस्करण,1411 वङ्गाव्द.
5) मुखोपाध्याय गोविन्तगोपाल, श्रुतिसञ्चयनम्(प्रथम खण्ड), वर्धमान विश्वविद्यालय, प्रथम प्रकाश, 18 जुलाइ 1977.
6) मनु, मनुसंहिता, श्रीयुक्त पञ्चानन तर्करत्न, संस्कृत पुस्तक भान्डार, कलिकाता-6, अक्टोवर 1993.
7) श्रीमद्भागवत महापुराण, गीताप्रेस, गोरक्षपुर